# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-३ ( Sem_6 )** **प्रश्नपत्र-८** **गुणाः - ७०**

**विषयः - धर्मशास्त्रम्** CE 3.6.12 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः** - 26/04/2016 **सन्दर्भग्रन्थः - मनुस्मृतिः**

---

**विभागः - १**

**प्रश्न-१ द्वयोः ससन्दर्भं व्याख्या कार्या । ०८**

१. सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत् । तया स काये निर्दग्धे मुच्यते किल्बिषात् ततः ॥

२. यस्य कायगतं ब्रह्म मध्येनाप्लाव्यते सकृत् । तस्य व्यपैति ब्राह्मण्यं शूद्रत्वं च स गच्छति ॥

३. भृत्यानामुपरोधेन यत्करोत्यौर्ध्वदेहिकमम् । तद् भवत्यसुखोदर्कं जीवतश्च मृतस्य च ॥

**प्रश्न-२ द्वयोः कस्यचिदेकस्य सविस्तरमुत्तरं लिखत । ०८**

१. पतितलक्षणं विलिख्य महापापानां विवरणं यथाग्रन्थं विवेचयत ।

२. धर्मशब्दस्य व्याख्यां विलिख्य तल्लक्षणं प्रतिपादयत ।

**प्रश्न-३ टिप्पणीद्वयं लिखत । ०४**

१. सुराप्रकाराः ।

२. धर्मस्वरूपम् ।

३. उपपातकानि ।

४. ब्रह्मवधप्रायश्चित्तम् ।

**प्रश्न-४ पञ्चानामतिलघूत्तराणि प्रदेयानि । ०५**

१. प्रायश्चितस्य कोऽर्थः?

२. मनुस्मृतिशब्दस्य समासः कः?

३. श्रुतिशब्दस्य कोऽर्थः?

४. मन्वर्थमुक्तावली केन प्रणीता?

५. वेदत्रयीत्यस्य कोऽर्थः?

६. मनुस्मृतेः कति श्लोकाः सन्ति?

७. द्विज - इत्यस्य व्युत्पत्तिजन्योऽर्थः कः?

**विभागः - २**

**प्रश्न-५ निम्ननिर्दिष्टेषु श्लोकेषु द्वयोः भावार्थः देयः । ०८**

१. मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च । कूपवापीजलानां च शुद्धिश्चान्द्रायणं स्मृतम् ॥

२. ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम् । वैश्यस्य तु तपो वार्ता तपः शूद्रस्य सेवनम् ॥

३. यथा महाह्रदं पराप्य क्षिप्तं लोष्टं विनश्यति । तथा दुश्चरिते सर्वं वेदे त्रिवृत्ति मज्जति ॥

**प्रश्न-६** **कस्यापेकस्य सविस्तरं विवरणं कुरुत ।** **०८**

१. धर्मेण हीना पशुभिः समानाः – सविस्तरं लिखत ।

२. गुप्तपापानां प्रायश्चितनिरूपणं कुरुत ।

**प्रश्न-७** **द्वयोरेकस्य टिप्पणी लेख्या ।** **०२**

१. व्रातङ्गानि ।

२. महर्षिः मनुः ।

**प्रश्न-८** **द्वयोः अतिलघूत्तरं विलिख्यताम् ।** **०२**

१. क्षत्रियस्य मुख्यधर्मः कः?

२. व्रतशब्दस्य कोऽर्थः?

३. ब्राह्मणस्य हननेच्छुकस्य का गतिः?

४. वेदज्ञः कः अस्ति?

**विभागः – ३**

**प्रश्न-९** **कयोश्चिद् द्वयोः ससन्दर्भं व्याख्या कार्या ।** **०८**

१. सत्त्वं ज्ञानं तमोऽज्ञानं रागद्वेषो रजः स्मृतम् । एतद्वयाप्तिमदेतेषां सर्वभूताश्रितं वपुः ॥

२. संभवांश्च वियोनीषु दुःखप्रायासु नित्यशः । शीतातपाभिघातांश्च विविधानि भयानि च ॥

३. शुभाशुभफलं कर्म मनोवाग्देहसंभवम् । कर्मजा गतयो नृणामुत्तमाधम मध्यमाः ॥

**प्रश्न-१०** **एकस्य वर्णनं सविस्तरं कुरुत ।** **०८**

१. द्वादशाध्यायस्य सारांशं लिखत ।

२. धर्मो रक्षति रक्षितः – सूक्तिमिमां विवेचयन्तु ।

**प्रश्न-११** **द्वयोः टिप्पणी विधेया ।** **०४**

१. वेदप्रशंसा ।

२. परिषदः ।

३. आत्मस्वरूपम्त्रिदण्डिपरिचयः ।

**प्रश्न-१२** **पञ्चानां लघूत्तराणि लिखत ।** **०५**

१. धर्मशब्दस्य व्युत्पत्तिः का?

२. मानसकर्माणि कति सन्ति?

३. को नाम क्षेत्रज्ञः?

४. आत्मनः कति गुणाः सन्ति?

५. राजसगुणलक्षणं किम्?

६. आचार शब्दे कः धातुः अस्ति?

७. वैदिककर्म कतिविधम्?